दिनांक 19-6-21

शास्त्री तृतीयखण्ड, विषय-व्याकरण

ग्रन्थ- न्यायसिद्धान्तमुक्तावली (प्रत्यक्षखण्डम्)

प्रश्न- परिमाण्डल्यभिन्न पदार्थसाधर्म्य निरूपणं क्रियताम्:

उत्तर— परिमाण्डल्यम् अणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः। परमाणु द्व्यणुकसाधारणम् अणुपरिमाणं इत्यर्थः। परिमाण्डल्यस्य कारणत्वे बाधकम्। परिमाण्डल्यभिन्नानां द्रव्यगुणकर्मपरिमाणस्य कारणत्वाभाव तत्रातिव्याप्तिः अतः परिमाण्डल्यपदं द्रव्यगुणकर्मपरिमाणसाधारणम् लक्षणम् तेन तस्याप्यलक्ष्यत्वमित्यभिप्रेत्याह इति। तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत्, तच्च न सम्भवति। परिमाणस्य स्वसमानजातीयस्वोत्कृष्टपरिमाणजनकत्वनियमात्। महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गात्। सामान्यन्तु परिमाणविभाजकरूपेण बोध्यम्। एवं परममहत्परमाणुमतीन्द्रियसामान्यविशेषाश्च बोध्याः। उत्कृष्टं चाणोरणुतरमेवेति भावः। न चाणुजन्यस्याणुतरत्वमस्तु किं बाधकमिति वाच्यम्, तथा सति त्रसरेणौ द्व्यणुकत्वप्रसङ्गात्। ननु तर्हि द्रव्यगुणकर्मादिपरिमाणस्य किं जनकमिति चेत्, सङ्ख्यैव कित्यवहित्व स्वरूपेण भवतीति चेदुपरिष्टात्। एवमपि बोध्या इत्यनेनान्वयः न कारणानीति बोध्या ऐन्द्रियकयोर्महत्त्वसामान्ययोः स्वविषयक लौकिकप्रत्यक्षे हेतुत्वात्॥

इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं ज्ञायमानं सामान्यं न प्रत्यासत्तिः ज्ञायमानं लिङ्गं नाऽनुमितिकरणमित्यभिप्रायेणोक्तम्। आत्ममानसप्रत्यक्षे आत्मपरममहत्त्वस्य कारणत्वात् परममहत्परिमाणमाकाशादेर्बोध्यम्। तथापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये। तन्न। ज्ञानातिरिक्तं प्रत्यक्षकारणतया आचार्यैरुक्तत्वात् इति।

अमरनाथ मिश्र
उपा० प्रो० व्याकरण
रा० उ० सं० म० वि०
रवलसेना पूर्णिया

(दिनांक 19-6-21)

उपशास्त्री द्वितीय वर्ष, विषय- व्याकरण

रत्न- सिद्धान्तकौमुदी व्याख्यात्मको भागः।

प्रश्न-1 उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते, इत्यस्य व्याख्या कार्या।

अभिनवविषये अमरेण उक्तम् - स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः। अनुलापो मुहुर्भाषा विलापः परिदेवनम्। विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः। सुप्रलापः सुवचनमपलापस्तु निह्नवः इति।

प्रश्न-2- शितपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि
अस्य कारिकायाः व्याख्या कार्या:

उत्तर- शितपा यथा भवति इति तपाति वाति द्राति इत्यादि। तेन प्रत्यङ्ग इति त्यादौ नैर्गदपद णत्वं न। शपा यथा भवेति तेन सिगतेः भाते: इसनिलि नैरिलती त्यत सार्वधातुक इतीडविकल्पो न किन्तु नित्यमेवेट्। एकाच् इति निषेधा पत्तेः। अनुबन्धेन निर्दिष्टो द्विधा स्वरूपेणेतसंज्ञकत्वेन च। स्वरूपेण यथा शीङ्: सार्वधातुके गुणः दीडो युडचि इति। शी शीतः। देङि ताः तसि क्त प्रत्यये चेमे क्रमेणोदाहरणे। इत्संज्ञकत्वेन यथा अनुदात्तङित: स्पर्शोऽशीङादिभ्यः अनुदात्तङित: इत्यात्मनेपदं न एकाजग्रहणं प्रकृतसूत्रे। तेन वे[illegible] वेविदत्वः इत्यादौ चिणविधेयो र।

न च शितपाशपाद्यंशे कपमिदं ज्ञापकमिति भाषायाम् एकदेशानुमतिद्वारा सर्वत्र ज्ञापनस्य उपपदमतिङ इत्यादौ दृष्टत्वात्। अतएव गतिकारके पपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः इति सिद्धमित्युक्तम्। अनभ्यासे: स्यति इति भरेत्यादिभिः शितपादिभिरेव ज्ञापनसम्भवाच्च। अपरस्परा: इति सूत्रस्थसातत्यग्रहणेन एकदेशा मनुमत्या लुग्वाऽऽदवपम: कते इत्येव पूर्वाचार्यश्लोको ज्ञापित इति तत्रैवावोचाम। मनोरमायां त्वेकदेशानुमतिद्वारा पूर्वाचार्यपठित परिभाषाया ज्ञापनस्य गतिकारकोपपदानाम् इत्यादौ दृष्टत्वादित्युक्तं तदयुक्तमिति नव्याः। गतिकारकोपपदनाम् इत्यादाविव हि पूर्वाचार्याणां परिभाषया। न च ज्ञापकं तत्रैव दृष्टमिति युज्यते इत्युक्तम्।

अमृतायनि ...
रसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
रुद्रसेना पूर्णिया